सम्पादकः - मलयपोडे

आलङ्कारिकः - शुभदीपपालः, तथागतमण्डलः

## सूचीपत्रम्


| | |
|---|---|
| विश्वासेन भगवद्दर्शनम् | बुलेट्-मण्डलः |
| तथागतो बुद्धः | विष्णुपद-पालः |
| जाबालः सत्यकामः | सुदीप्त-दे |
| शङ्करगीतिस्तोत्रम् | आवीरलाल-गङ्गोपाध्यायः |
| शङ्कराचार्यः | सुप्रिय-गोस्वामी |

# विश्वासेन भगवद्दर्शनम्

## बुलेट्-मण्डलः, समन्वित-एम्-ए-कक्षायां द्वितीयवर्षीयः

फल्गुनद्याः तीरे वसन्तपुराख्यः ग्रामः। तस्मिन् ग्रामे निवसति मत्स्यविक्रेता विमलः। तस्य पत्न्याः नाम प्रभावती। तयोः पुत्रस्य नाम सुमन्तः। विमलस्य पिता गदाधरः पञ्चभ्यो वर्षेभ्यः पूर्वं दिवं गतः। विमलः प्रतिदिनं मत्स्यहट्टे मत्स्यं क्रीत्वा ग्रामं ग्रामं गत्वा विक्रीणीते । एवमुपार्जितेन धनेन स कालं यापयति। सुमन्तः प्रतिदिनं वनं गत्वा वृक्षात् पतितानि नीरसपत्राणि आनयति। तैः माता पाककार्यं करोति।

एकस्मिन् दिने माता सुमन्तम् उक्तवती यद् अरण्ये यदि कदापि भयम् अनुभूयते तर्हि तवाग्रजं मधुसूदनम् आह्वयतु, सः अरण्ये तिष्ठति। सरलः सुमन्तः मातृवचनं मनसि अवधार्य वनं जगाम। तद्दिने स भयहीनः सन् इन्धनम् आनीतवान्।

एकस्मिन् दिने मधुसूदनं दिदृक्षुः सुमन्तः मातृवचनं स्मृत्वा अरण्यं प्राविशत्। यदा अरण्यस्य किञ्चिद् अन्तः प्रविष्टवान् तदा कुतश्चित् शृगालरवः श्रुतः, अन्यतश्च जन्तूनां गर्जनं श्रुतम्। तदा सुमन्तः भयेन धावितुमारेभे। किञ्चित् परं स दिग्भ्रष्टः सञ्जातः। स वारं वारं मधुसूदनम् आहूतवान्। तदा करुणालयः भगवान् श्रीकृष्णः बालकरूपेण कस्यचिद् वृक्षस्य शाखायाम् आविर्भूय वंशीवादनम् आरेभे। वंशीध्वनिं श्रुत्वा वीतभयः स तं वृक्षं प्राप। मधुसूदनः वृक्षादवतीर्य भयं नास्तीति आश्वास्य माता कथमस्ति इति अपृच्छत्। अपराह्णे स बालको ग्राममागच्छत्। तस्य माता विष्णुमन्दिरे देवं पूजयित्वा पुत्ररक्षणञ्च प्रार्थयित्वा गृहम् आगच्छन्ति स्म। तदा सा प्रफुल्लवदनं प्राप्तानन्दं पुत्रं दृष्ट्वा हृष्टा परमस्नेहेन तस्यालिङ्गनं कृतवती। मात्रा पृष्टः सुमन्तः सर्वं वृत्तान्तं मात्रे न्यवेदयत्। सर्वं श्रुत्वा माता आश्चर्यचकिता।

एवं सरलेन विश्वासेन सिध्यति भगवद्दर्शनम्।

## तथागतो बुद्धः

## विष्णुपद-पालः, समन्वित-एम्-ए-कक्षायां चतुर्थवर्षीयः

बहुदिनं यावत् राज्ञः शुद्धोदनस्य कोऽपि पुत्रो नोत्पन्नः। परन्तु एकस्मिन् दिवसे तस्य पत्न्या मायादेव्या स्वप्ने दृष्टं यत् तस्या उदरे शुभ्रगज इव कश्चित् प्रविष्टः। केभ्यश्चित् दिनेभ्यः परं राजपरिवारे वार्ता आगता यत् मायादेवी गर्भिणी इति। तस्मिन् समये मायादेवी पित्रालयं गन्तुम् इच्छुका आसीत्। पित्रालयगमनकाले मार्गे एव मायादेव्याः पुत्रः समुत्पन्नः। तस्य पुत्रस्य नाम आसीत् सिद्धार्थः इति। तदनन्तरं मायादेवी पुत्रस्य पालनदायित्वं भगिन्यै प्रजापतये प्रदाय दिवं गता।

राजपरिवारस्य मनीषिणः शुद्धोदनस्य पुत्रं प्रेक्ष्य प्रोक्तवन्तः यद् अयं भाविनि काले ससागराया धरण्या एकाधिपत्यं करिष्यति अथवा सन्न्यासी भूत्वा मनुष्यस्य आध्यात्मिकभावनायाः नूतनः पथप्रदर्शकः सन् विश्वे पूजितो भविष्यति इति। मनीषिवाक्यं निशम्य राजा शुद्धोधनः चिन्तितः। स पुत्रस्य सन्न्यासं नेष्टवान्। अतः पुत्रः कदापि दुःखं यथा न प्राप्नुयात् तथा व्यवस्थाकरणाय कर्मचारिण आदिष्टवान्। बहिर्दृश्यं सिद्धार्थो न पश्येद् अतः राजभवनं परितः प्राचीरं निर्मितम्।

बाल्यकालादेव सिद्धार्थस्य मनसि राज्यशासनादिकार्येषु आसीद् विरागः। पुत्रेण राज्यपालनं न भविष्यति इति मत्वा राजा अतीव चिन्तित आसीत्। परिणये सति मतिपरिवर्तनं स्यादिति धिया सिद्धार्थस्य यशोधरया सह परिणयं कारितवान्। सिद्धार्थस्य पुत्रः राहुलः समुत्पन्नः। राजा शुद्धोदनः राज्यभारं पुत्राय समर्पयितुमिष्टवान्। परन्तु एकदा स राजप्रासादाद्बहिः रथेन गच्छन् कुष्ठरोगनिपीडितं जनं ददर्श। तेन तस्य मनसि दुःखमुदितम्। तस्मात् कालादेव जनानां दुःखनिवृत्तेः उपायचिन्तनं तेन प्रारब्धम्। क्रमशस्तस्य वैराग्यानलः प्रदीप्तः। एकदा स जनानां दुःखनिवृत्तये आत्मस्वरूपावबोधाय राजभवनं त्यक्त्वा सन्न्यासं गृहीतवान्।

तदानीन्तनकाले अविवेकिनां ब्राह्मणानाम् अत्याचारेण उत्पीडितानां जनानां मुक्तिप्रदानाय स कस्यचिद् अश्वत्थवृक्षस्य मूले ध्यानं चकार। तत्र तस्य

बोधिलाभः सञ्जातः। बोधिसम्प्राप्तेः स बुद्ध इति नाम्ना प्रसिद्धः। बुद्धः राजपुत्रः सन्नपि सामान्यः सन्न्यासी इव जीवनयापनं चकार। तस्य पिता केवलं राज्ये स्थितानां नराणां रक्षणद्दायित्वं तस्मै प्रदातुमिष्टवान्, परन्तु बुद्धः जगति स्थितानां समेषां द्दायित्वं स्वीकृतवान्। अत एव बुद्धः जगत्पिता अभूत्।

बुद्धस्ततः सारनाथं गत्वा तत्र कौण्डिन्यादिशिष्येभ्यो धर्मोपदेशं ददौ। तेन न हि आत्मतत्त्वोपदेशो विहितः, अपि तु आत्मतत्त्वलाभाय य उपायस्तस्यैवोपदेशो विहितः। तस्योपदेशेषु अष्टाङ्गयोगो मार्गः अन्यतमः। तानि अष्टौ अङ्गानि तावत्- सम्यक् चिन्तनम्, सम्यक् सङ्कल्पः, सम्यक् वाक्यम्, सम्यक् आचरणम्, सम्यक् जीवनधारणम्, सम्यक् ध्यानम्, सम्यक् मननम्, सम्यक् समाधिः इति । बुद्धस्य अहिंसा समत्वञ्च परमो गुणः। अतः स यागे पशुबलिविरोधी आसीत्। समभावापन्नत्वादेव स गणिकायाः सकाशादपि भिक्षां स्वीकृतवान्। पुनश्च तस्यै धर्मोपदेशोऽपि प्रदत्तः।

बुद्धो हि दुःखेष्वनुद्विग्नमना वीतरागभयक्रोधः स्थितधीरासीत्। अत एव पितरि पुत्रे च मृतेऽपि नासीत् शोकः, राजपरिवारत्यागे च नासीत् कष्टम्। तस्य हि महिम्ना दुष्टोऽपि सज्जनः संवृत्तः। अङ्गुलिमालानामकासुरो बुद्धाद् धर्मोपदेशं स्वीकृतवान्। बुद्धोपदिष्टानि वचांसि स्वीकृत्य तस्य शिष्यैः स्वस्वसामर्थ्यानुगुण्येन बुद्धधर्मस्य चत्वारि मतानि प्रस्थापितानि- माध्यमिकं, सौत्रान्तिकं, वैभाषिकं योगाचारश्चेति।

अज्ञानतिमिरे लोके प्रादुर्भूतः प्रदीपकः।
नमोऽस्ति बोधिसत्त्वाय सम्बुद्धाय नमो नमः।।

# जाबालः सत्यकामः

## सुदीप्त-दे, समन्वित-एम्-ए-कक्षायां चतुर्थवर्षीयः

इदानीन्तनकालापेक्षया प्राचीनकालिनी शिक्षाव्यवस्था किञ्चित् कठिना आसीत्। गुरवः तपोवने निवसन्ति स्म। धनिकस्य दरिद्रस्य च पुत्राः तत्र पठन्ति स्म। छात्रा अध्ययनाय गुरुभिः साकं निवसन्ति स्म। ते न केवलं पठन्ति स्म, अपि तु गुरुसेवामपि कुर्वन्ति स्म।

गौतममहर्षिः एकस्य गुरुकुलस्याचार्य आसीत्। एकस्मिन् दिवसे कश्चन युवा आश्रमं प्रति आगत्य नतमस्तकः गुरोः समीपे उपविवेश। कृताञ्जलिः स गुरुम् उक्तवान्- 'भो भगवन् कृपया मां छात्ररूपेण अनुगृह्णातु' इति। गौतमः स्नेहेन उक्तवान्- 'वत्स! तव पितुः नाम किम्? कस्मिन् वंशे त्वं जातः?' इति। एतस्यैव प्रश्नस्य उत्तरं स गृहात् आगमनात् प्राक् मातरं पृष्टवान्- 'मातः! अहं अध्ययनाय गुरुगृहं गन्तुम् इच्छामि। मम वंशः कः? वदतु' इति।

प्रश्नेनानेनैव मातुः हृदयम् आन्दोलितम्। बाल्यावस्थायामेव तस्य मातुः विवाहः जातः। तस्याः समग्रं जीवनं भर्तुः सेवायां गतम्। पत्युः देहपातात् अनन्तरं तस्याः सर्वस्वं पुत्र एव आसीत्। सा तस्याः पत्युः वंशं स्मर्तुं न शक्ता। सा सत्यवादिनी आसीत्। अतस्तस्य पुत्रः अपि सत्यवादी। सा उक्तवती- 'पुत्र! नाऽहं जाने तव पितुः कुलम्। त्वं गुरुं गत्वा कथय यत् तव मातुः नाम जाबाला। तव नाम सत्यकामः' इति। स बालः गुरुम् एत्य जननीप्रोक्तं वचो यथायथं निवेदितवान्। तस्य सत्यवचनम् आकर्ण्य गुरुः प्रसन्नः सञ्जातः। 'सत्यात् नास्ति परो धर्मः' इति कारणाद् गुरुः तं छात्ररूपेण स्वीकृतवान्। गौतमात् स बहूनि वर्षाणि बहूनि शास्त्राणि अधीतवान्। एकदा गुरुः तम् आहूय उक्तवान् यत्- 'वत्स! गौः अस्माकं सम्पद्। गवां भोजनाय अत्र तथा तृणानि न उपलभ्यन्ते। अहं तुभ्यं शतं गाः ददामि। एतासां गवां चारणाय त्वम् अन्यत्र गच्छ। यदा गाः सहस्राधिकाः भविष्यन्ति तदा प्रत्यानयतु' इति।

गुरोरादेशेन स गोचारणाय प्रस्थितः। गुरोः निर्देशानुसारेण स प्रतिदिनं ध्यानं करोति स्म। एवं बहूनि दिनानि व्यतीतानि। एकदा ध्यानवेलायां स मनुष्यस्य कण्ठध्वनिं श्रुतवान्। स दृष्टवान् काचित् गौः मनुष्यस्वरेण वार्तालापं करोति। एतद् दृष्ट्वा स चकितः। सा गौः उक्तवती- 'भो सत्यकाम, अहं वायुदेवः अस्मि। अहं तव भक्त्या प्रसन्नः अस्मि। तुभ्यम् आध्यात्मिकज्ञानप्रदानाय अहमत्र समागतः। अखिलशास्त्रज्ञानं ते भविष्यति। तव गाः गणय' इति। गवां गणनेन तेनावगतं यद् गाः सहस्राधिका जाताः। एतत् दृष्ट्वा सानन्दं गोभिः साकं गुरुकूलं प्रति गतः। प्रत्यागमनकाले सः अग्निदेवाताया उपदेशं प्राप्तवान्। ततः परं किञ्चिद् अग्रतो गत्वा यदा स एकस्यां रात्रौ ध्यानाय उपविष्टः तदा हंस आगत्य तस्मै अध्यात्मतत्त्वमुपदिष्टवान्। तदा स ब्रह्मज्ञानी सञ्जातः। ब्रह्मज्ञानेन तस्य मुखं ज्ञानज्योतिषा पूर्णं प्रदीप्तञ्च।

गुरुः तं दृष्ट्वा उक्तवान् 'वत्स! तव मुखं ज्ञानिन इव शोभते। किं वने त्वां कोऽपि किमपि उपदिष्टवान् वा?' इति। सत्यकामः सर्वं वृत्तान्तं गुरवे निवेदितवान्। ज्ञानी सन्नपि सत्यकामः स्वगुरुमुखाद् ब्रह्मज्ञानं श्रोतुम् अवाञ्छत्। गौतमोऽपि तस्मै योग्याय शिष्याय ब्रह्मविद्याम् उपदिष्टवान्।

एवम् अस्यां कथायां वयं पश्यामः सत्यप्रतिष्ठा गुरुवाक्यानुसारित्वञ्च परमं ज्ञानं प्रददाति।

# शङ्करगीतिस्तोत्रम्

आवीरलाल-गङ्गोपाध्यायः, समन्वित-एम्-ए-कक्षायां द्वितीयवर्षीयः

चरमचरणसम्प्रापणतत्परशैशवहितनिजकेतम् ।
धृतगैरिकवसनार्थितगुरुपदतदनुग्रहपरकेतम् ।।१।।
शशिधरधृतमातङ्गकलेवरदूरीकृतवैषम्यम् ।
नौमि सुधामयचैतन्याम्बुधिपावितसुचरितसौम्यम् ।।२।।
बुद्धसुबोधितमतिगणदुर्मददामविभञ्जनशालिन् ।
निजपरतत्त्वविखण्डितमण्डननिजकरमण्डितमालिन् ।।३।।
निजमतमण्डनसकलविमतगणवन्दितपदयुगशालिन् ।
विधिविधुनाथरमाधवविलिखितविमलपुण्ड्रयुतभालिन् ।।४।।
भानुविभाम्बुधिनिर्मलभाभवभुवनतमोहरणास्यम् ।
निखिलनिगमसकलागमसारसमुद्भवसुविमलभाष्यम् ।।५।।
नरमुनिसुरगणपूजितधामरजोगणभूषितपादम् ।
वन्दे वेदशिरोगणबोधकदेशिकशङ्करपादम् ।।६।।

# शङ्कराचार्यः

## सुप्रिय-गोस्वामी, समन्वित-एम्-ए-कक्षायां तृतीवर्षीयः

तथागते प्रस्थिते स्वधाम्नि विकृतबौद्धधर्मकरालग्रासाच्छादितं शून्यवादाचारप्लावितं म्रियमाणसनातनधर्ममभवद् भारतवर्षम्। तदा वेदपुराणादिभित्तिकस्य सनातनधर्मस्य भारतवर्षे पुनः प्रतिष्ठां चिकीर्षुः भगवान् शङ्करो दक्षिणभारते कालाडिनामके ग्रामे शङ्कररूपेणावततार। यदैव धर्मो ग्लायते अभ्युत्थानं चाधर्मस्य भवति तदैव भगवान् धृतविग्रहो धरापृष्ठे अवतरति।

बोधिसत्त्वो जातिधर्मवर्णपार्थक्यमविगणय्य सर्वेभ्यो जनेभ्यो निर्वाणलाभाय मार्गमुपदिदेश। परन्तु बुद्धदेवे दिवं गते तदुपदेशसारमजानन्तो मोक्षमनिच्छन्तो बौद्धसन्न्यासिनः प्रचारकाश्च स्वाभिप्रायानुसारेण सनातनधर्मस्य विरुद्धतया बुद्धोपदेशान् व्याख्याय सनातनधर्मस्य नाशकर्मणि रताः। तदा एव सनातधर्मं स्वे महिम्नि प्रतिष्ठापयितुं परमेश्वरो महेश्वरो वसुलयऋतुशकाब्दे (६०८) वैशाखमासस्य द्वादशदिनाङ्के शुक्लपञ्चम्यां शिवगुरोः विशिष्टायां शङ्कररूपेण समजनि।

अमितगुणोपेतस्य अलौकिकशक्तिकस्य श्रुतिधरस्य शङ्करस्य बाल्यजीवनमासीद् आश्चर्यजनकम्। यदा तस्य वयो वर्षत्रयं तदा स पुराणकथामाकर्ण्य स्मृतौ स्थापने समर्थ आसीत्। पञ्चमे वयसि तस्योपनयनं संवृत्तम्। ततः स गुरुगृहे स्थित्वा वर्षद्वये एव साङ्गान् वेदान् शास्त्रान्तराणि च अधीत्य पण्डितः सम्पन्नः। आसीत् स कृपालुः, गुरुसेवको मातृभक्तश्च। तदीयमातृभक्तिप्रभावेण पूर्णानद्याः पवित्रं पयःस्रोतः परिवर्तितम्। अथैकदा केचन दैवज्ञा आगत्य विशिष्टादेवीं शङ्करस्य भाविकालं सूचितवन्तः। ते उक्तवन्तो यत् शङ्करस्य मरणसमयः अष्टमवर्षमस्ति, तस्यायुर्वृद्धिः पुनरष्टवर्षाणि भवितुमर्हन्तीति।

एकदा पूर्णानद्यां स्नानरतः शङ्करः मकरग्रस्तः सन् मात्रे सन्न्यासानुमतिं प्रार्थयामास। मातापि पुत्रक्लेशं वीक्ष्य सन्न्यासानुमतिं प्रदत्तवती। मनसा सन्न्यासस्वीकारात्परमेव स मकरः शङ्करं त्यक्त्वा गतः। ततः बालसन्न्यासी शङ्करो

मात्रे प्रतिज्ञात्रयमुच्चार्य योगिजनसाधनभूमिं नर्मदातीरं प्रस्थितः। मातृभक्तः स मातुरन्तिमकाले मातृसमीपं सम्प्राप्तः, मात्रे च इष्टदेवतां दर्शयामास।

नर्मदातीरं प्राप्य तत्र गुहायां तपस्यन्तं गोविन्दपादाचार्यं दृष्टवान्। शङ्करस्तुत्या गोविन्दपादाचार्यः समाधित उत्थितः। गोविन्दपादाचार्योपदिष्टेन मार्गेण समाधिना शङ्कराचार्य आत्मसाक्षात्कारं चकार।

ततो निर्विकल्पसमाधिनात्मसाक्षात्कारेण जगदिदं मायिकमिति तस्यानुभूतिः संवृत्ता। ततः सगुणं ब्रह्मापि मायिकमिति तेन चिन्तितम्, परन्तु माता अन्नपूर्णा सगुणब्रह्मतत्त्वोद्देशेन तस्य तां धारणां दूरीकृतवती। ब्रह्मणो निर्गुणत्वं सगुणत्वमवगम्यापि स ब्राह्मणचण्डालादिभेददर्शी आसीत्। तस्य भेददृष्टिर्महादेवेन स्वयं चण्डालवेशेन निराकृता।

बहुषु विद्वद्गोष्ठीषु वादादिना परमतनिराकरणपुरःसरं तेनाद्वैतवेदान्ततत्त्वं प्रतिष्ठापितम्। तस्य बहवः शिष्या आसन् तेषु सनन्दनः सर्वोत्तमः। तस्यैवाभिधानं पद्मपादाचार्य इति। आचार्येण शङ्करेण उपनिषद्गीताब्रह्मसूत्राणां भाष्याणि विरचितानि। एकदा वेदव्यास आगत्य तस्य भाष्यं श्रुत्वा प्रसन्नः सन् श्रुतेर्ज्ञानकाण्डप्रचाराय तमादिदेश। वेदव्यासप्रसादात् तस्यायुषः षोडशवर्षात्मिका वृद्धिः सञ्जाता। तेन मीमांसकप्रवरो मण्डनमिश्रः तर्केण पराजितः। ततः स शङ्करशिष्यतां स्वीचकार। तस्यैव नाम सुरेश्वराचार्य इति।

अद्वैततत्त्वस्य प्रचाराय स हस्तामलकतोटकाचार्यादीन् शिष्यानुपदिदेश। सेतुबन्धरामेश्वरनामके स्थाने अद्वैतसत्यताप्रतिपादनाय भवानीपतिमन्दिरे स जनान् शिवदर्शनं कारितवान्। तत्र भगवान् महादेवः अद्वैतस्य सत्यतामङ्गीकृतवान्। ततः स काश्मीरे वीणापाणिमन्दिरे सर्वान् पण्डितान् पराजित्य सर्वज्ञत्वोपाधिं प्राप्तवान्।

तेन वैदिकधर्मस्य संरक्षणाय दशनामीसम्प्रदायः प्रवर्तितः पीठचतुष्टयं प्रतिष्ठापितञ्च। पूर्वस्यां दिशि पुर्यां पूर्वाम्नाय-श्रीगोवर्धनपीठं, पश्चिमस्यां दिशि द्वारकायां पश्चिमाम्नाय-श्रीसारदापीठम्, उत्तरस्यां दिशि बद्रीक्षेत्रे उत्तराम्नाय-श्रीज्योतिःपीठं, दक्षिणस्यां दिशि च श्रृङ्गगिरौ दक्षिणाम्नाय-श्रीसारदापीठं निर्मितवान्

शङ्कराचार्यः। तेषां पीठानामध्यक्षः शङ्करशिष्यः क्रमशः पद्मपादाचार्यः, सुरेश्वराचार्यः, तोटकाचार्यो हस्तामलकाचार्यश्चासीत्।

शङ्करावतारः शङ्कराचार्यः परस्परविरोधिनः धर्मसिद्धान्तस्य कोलाहलं प्रशमितवान्। स कस्यापि नवीनधर्मस्य प्रचारं प्रतिष्ठां वा न कृतवान्, अपि तु भारतवर्षे प्राचीनकालात्प्रचलितस्य सनातनधर्मस्य स्वे महिम्नि पुनःप्रतिष्ठां चक्रे।

श्रुतिस्मृतिपुराणानामालयं करुणालयम्।
नमामि भगवत्पादं शङ्करं लोकशङ्करम्।।